International Journal of Advanced Academic Studies 2020; 2(3): 769-771




**E-ISSN:** 2706-8927
**P-ISSN:** 2706-8919
www.allstudyjournal.com
IJAAS 2020; 2(3): 769-771
Received: 19-05-2020
Accepted: 22-06-2020

**डॉ0 अश्विनी कुमार**
बेहटा, बेनीपट्टी, मधुबनी, बिहार, भारत

**Corresponding Author:**
**डॉ0 अश्विनी कुमार**
बेहटा, बेनीपट्टी, मधुबनी, बिहार, भारत

# रीतिसम्प्रदायस्य आचार्याः तेषां लक्षणानि च

**डॉ0 अश्विनी कुमार**

**प्रस्तावना**

रीतिसम्प्रदायस्य प्रवर्त्तको वामनः, तन्मते रीतिरात्मा काव्यस्य। पदसङ्घटना– रीतिः, सेयं पदसङ्घटना गुणेष्वायत्तेति रीतिसम्प्रदायी गुणसम्प्रदायात्मना परिणमते। रीतिभेदानां व्यवस्थितं वर्णनं दण्डिनाऽपि कृतम्। गुणालङ्कारयोरसङ्कीर्ण रूपं प्रकाश्य गुणानां शब्दार्थगतत्वेन विशतिप्रकारता वामनेनैव प्रतिपादिता। वामनेन काव्यशोभायाः कर्त्तारो धर्मा गुणास्तदतिशयहेतवस्त्वलङ्काराः स्वीकृताः। भामहादयो यत्र रसमलङ्कारं मन्यमानं तं काव्यस्य बहिरङ्गं समर्थितवन्तो वामनस्तत्र रसं कान्तिगुणस्वरूपमाख्याय तस्यावश्यकता स्वीकृतवान्।

'वक्रोतिः काव्यजीवितमि'त्यवदन्[1] कुन्तकादयः। वक्रोक्तिः प्रसिद्धाभिधानव्यतिरिक्ता विचित्रैवाभिधा। सैव वैदग्ध्यभङ्गीभणितिशब्देन स्फुटीकृता वक्रोक्तिजीविते।

भामहेन अतिशयोक्तिरेव वक्रोक्तिनाम्ना उक्ता, सैव चालङ्काराणां बीजं यथार्थम् तेनैव–

''सैषा सर्वत्र वक्रोक्तिरनयाऽथौ विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना।।' [2]

ध्वनिमतं परिच्छिन्दन्नपि कुन्तको वक्रोक्तेः स्वरूपं तथा विस्तृतं चक्रे यथा ध्वनिस्तत्रैव समाहितः। उपचारवक्रतायां ध्वनेः समावेशस्तदभीष्टः।

सोऽयं वक्रोक्तिसम्प्रदायोऽनन्तरभाविभिराचार्येर्नादृतः। रूद्रटा वक्रोक्ति सामान्यत एकमलङ्कारं मत्वा तत्स्वरूपं समकीचयत्।

रसो न वाच्य इति साधयितुं प्रवर्त्तमान आचार्य आनन्दवर्धनो ध्वने रावश्यकतामुभूय ध्वनिसम्प्रदायं प्रवर्त्तितवान्। आनन्दवर्धनात्पूर्वं ध्वनेरभाववादः लक्षणास्वैरूपतावादः, अनिर्वाच्यतावादश्च प्रथते स्म। ध्वनिवादः सर्वाधिकव्यवस्थितरूपेण प्रचरितः।

अयं सर्वसम्प्रदायादृतः कस्यापि मतस्याविरोधी च सम्प्रदायः क्षेमेन्द्रेण प्रवर्त्तितः। काव्यस्य सर्वेष्वपि अङ्गेष्वौचित्यं नितान्तमपेक्षितम्। 'अदेशजो हि वेषस्तु न शोभां जनयिष्वति' इति नाटयशास्त्रेऽस्य सम्प्रदायस्य बीजं दृश्यते। समुद्रबन्धोयविवेचनाननुबद्धोऽपययं सम्प्रदायः सर्वैरादृतः।

'अनौचित्यादृते नान्यद्रसभङ्गस्य कारणम्।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा।। [3]
पञ्चमी साहित्यविद्या इति यायावरीयः।
साहि चतसृणामपि विद्यानां निस्यन्दः।। [4]

इति काव्यमीमांसायां राजशेखरेणोद्धृतेन सन्दर्भेण संस्कृतवाङ्मये साहित्यशास्त्रस्य नितरां महनीयं पदं सम्प्रतिपद्यते। आन्वीक्षिकी–त्रयी वार्ता दण्डनीतीनां चतसृणां विद्यानां सारसर्वस्वं 'रसो वैसः। रसंह्येवायं लब्ध्वाऽनन्दीभवतीति तैत्तिरीयोपनिषद्वाक्यध्वनिताऽशयानुसारेण ब्रह्मानन्दसहोदरा नन्दात्मकरसादिविषयकराद्धन्तानां प्रतिपादकमदः साहित्यशास्त्रं ब्रह्मानन्दसहोदरा नन्दात्मकरसादिविषयकराद्धन्तानां प्रतिपादकमः साहित्यशास्त्रं सरसमानवजीवने भृशममन्दानन्द–सन्दोहोत्समाविष्करोति। सहितस्य भावः साहित्यमितिव्यु त्पत्यनुसारेण रसालङ्कारगुणरीतिवक्रोक्तिध्वन्यौचित्याद्यन्यतमेन सहितयो शब्दार्थयोर्भावरूपं काव्यत्वं प्रतिपादयदिदं साहित्यशास्त्रं काव्यविषयक – समस्तसिद्धान्तान् निपुणं निरूपयति। चिकित्साशास्त्रं यथा व्याधिविनाशनक्षमाणां, जीवनसंवर्धनसाधनानाञ्च लौकिकरसादीनां समुपयौगिकं महत्त्वं समाख्यापयति, तथा हीदं शास्त्रं सहृदयहृदय – संवेद्यानिर्वचनीयालौकिकाऽस्वाद्य रसादीनां सकलविधेषु काव्येषु काव्यात्मविधया परमरमणीयत्वं परिवर्णयति। अतस्तावदद लोकोत्तरवर्णनानिपुणकविर्मात्मकश्रव्य–दृश्यादिकाव्यविषयकसिद्धान्ता नां सपरिकरनिरूपणप्रवण साहित्यशास्त्रं काव्यानुशासकाकाव्यशास्त्रमित्य – भिधानस्य चारितार्थ्य समश्नुते। प्राक्तनसमये काव्यशास्त्रीयराद्धन्ता – नामन्वाख्यापकैर्विमर्शकैश्च प्राचीनाचार्यैरिदं शास्त्रम् अलङ्कार – शास्त्रमित्यभिधानेनाभिधीयते स्म। अर्वाक्तने समयेत्वैतत् साहित्यशास्त्रं काव्यशास्त्रमित्याद्यनेकविधपर्यायवाच कैर्नामभिर्व्यपदिश्यत इति प्रतिपद्यते।

सर्वतः प्राथम्येन तत्र भगवता नटराजेन धूर्जटिना नाट्यशास्त्रं काव्यशास्त्रं समधिकृत्य विधाता समुपदिष्ट आसीत्। तदनु हंसवाहनेन चतुराननेन स्वमानसशिष्यवरा अष्टादशमुनिप्रवराः तत्र कविरहस्यं सहस्राक्षः समाम्नासीत्। औकितपुक्तिगर्भः, रीति निर्णयं सुवर्णनामः आनुप्रासिकं प्रचेता, यमकं यमः, चित्रं चित्रागदः, शब्दश्लेषं शेषः, वास्तवं पुलस्त्यः, औपम्यं औपकायनः, अतिशयं पराशरः, अर्थश्लेषं उतथ्यः, उभयालङ्कारिकं कुबेरः, वैनोदिकं कामदेवः, रूपकनिरूपणीयं भरतः, रसाधिकारिकं नन्दिकेश्वरः दोषाधिकारणंधिषणः, गुणौपादानिक उपमनयुः, औपनिषदिकं कुचुमारश्च। [5] शास्त्रेऽस्मिन् प्रशिक्षिताः प्रदीक्षिताश्च संविधीयन्ते स्म। अमीषु केवलयोर्नान्दिकेश्वर–भरतयोर्ग्रन्थविशेषाः सम्प्रति समुपलभ्यन्ते।

काव्ये यथा रसादिपरिपाको भवति तथैव रितेः परिपाको॥ ऽपि भवत्येव। प्रबोधचन्द्रोदये अमृतोदये नाटके च रसगुणालंकाररीतिरादि साहित्यिकगुणानां च समन्वयः दृश्यते। नाटकीयं शरीरं भवति वस्तुतत्त्वम्, तस्य वस्तु तत्त्वस्य विस्तारः पञ्चधा भवति, पञ्चसन्ध्यात्मकः। नाटकीयाः पञ्चसन्ध्याः पूर्वप्रसङ्गे निरूपिताः सन्तिवमुखम्, प्रतिमुखम्!, गर्भो, विमर्शः उपसंहारश्चेति। सर्वे एते सन्धयः नाटकोऽत्र प्राप्यन्ते। मुखसन्धौ कथाबीजस्य निक्षेपः क्रियते, निक्षिप्तञ्च बीजमारम्भाख्यया कार्यावस्थया समन्वितं विस्तारमाप्नोति। प्रकृतनाटकस्य प्रथमोऽङ्के प्रमिति–पुरूषसंयोगस्य बीजं निक्षिप्यते। प्रमित्याऽनुगतः पुरुषोऽवर्गं वाञ्छति। श्रुतेः कन्यायाः प्रमित्याः हठादपहरणं क्रियते नास्तिवादिनीभिः वियामिः। महामोहस्य क्षत्रज्ञनगरे साम्राज्यमस्ति, तस्य महामोहस्योन्मूलनार्थं तत्रापवर्गभमिषेक्तुं श्रुतेः संकल्पोऽस्ति। तदर्थं प्रमितेः प्रतिपादनमावश्यकमस्ति। कथाबीजं निक्षिप्तं यथ–भाव नूनमद्वैतसाम्राज्ये श्रुतिरपवर्गभमिषेक्तुमीहते इत्यादि वाक्येन। महामोहस्य सहयोगिनः चार्वाकाः जैनाः सौगताश्च श्रुतेः पुत्रीं प्रमिति मेवा पहरन्ति यथा–पुरुष–प्रमित्योः संयोग एव न संभवेत्। श्रुतिः प्रमितिं शत्रुहस्तगतां पुनः परिवारविद्याभिः मोचितां तां पुरूषाय प्रतिपादयितु मादि राति, किन्तु परिवारविद्याभिः पूर्वमेव प्रतिपादितां पुरूषाय प्रमितिः, पुरूषेण चानाहतां श्रुत्वा दुःखी भवति। साऽपरां कथां प्रवर्तयति, न्यायतनयाय परामर्शाय पक्षतां प्रतिपादयित मादिशति। हायोः पुत्री भविताऽनुमितिः यया संगतः पुरूषः प्रमितिमङ्गीकरिष्यतीति। इयं न्यायकथा प्रतिकथारूपेण द्वितीयोऽङ्के सङ्गयं नैव सेहते,तौ शपतः गर्भं धत्तां परामर्श सन्निकर्षेण पक्षता। अपत्ये जातमात्रे तु दम्पती न भविष्यतः। इहैव पक्षता– परामर्श संयोगकथायाः साफल्यं संसूचितं भवतिं, तयोरपत्यालाभं एव श्रुतेः प्रयोजनमस्ति। अनुमितिः प्रमिति पुरूषेण संगमयिष्यति। इहोपन्यस्तस्य कथबीजस्य विन्दुवत् प्रतीतिर्भवति। तेनात्र विन्दुरूपस्य कथातत्त्वय यत्नाख्यया कार्यावस्थया विकासः क्रियते। तत्रोदयनादयः न्यायाचार्यः चार्वाकादिभिः नास्ति विचारकैः समं घोरं युद्धं कृत्वा सर्वान् प्रतिपक्षान् निरस्यन्ति। फलतः पक्षता–परामर्शयोः संयोगः सम्बधते। यथा–दृढ़ासिप्रहार पतिते सोमसिद्धान्ते कापालिकनीललोहित–महाभैरव– भूत– डामरोमामहेश्वराद – दयोरणादय कान्ताः। वत्स परामर्श, जातं निष्कण्टकम्। एते च प्रतिबन्ध साधन सिद्धिभ्यां प्रतिसंस्कृताः कार्यायोजना धृति संहृतिपदप्रत्यय प्रभृतयः साधन प्रासादप्रदेशाः। तेषु पक्षतया सह विहरमाणो जनयिष्यसि भगवतीमनुमितिम्। अनया च संघटितः पुरुषः प्राप्तस्पति सिद्धिमिति। इत्यादि। एतत्प्रसाङ्गावलोकनेनात्राङ्के प्रतिमुख सन्धिः सन्ध्यङ्गैः सम्पुष्टाङ्गोऽवलोक्यते। तृतीयेऽङ्के गर्भाख्य सन्धिः परिलक्ष्यते। गर्भसन्धौ कथाबीजस्य पुनः पुनरन्वेषणं विधीयते। पुरूषः प्रमितिं श्रद्धास्यति नवेति संशयो वर्तते, कदाचित् काव्याशा जागति किन्तु पुनर्विनश्यतीति। तथा चात्र निर्वेदस्योक्तिखलोकनीयाऽस्ति– परैः प्रखह्यपह्तामपि प्रमितिमान्वीक्षिकी प्रत्याहृत्य पुरुष सादकरोत्। परतु–' पर बलपरिमर्दायासतान्तां नितान्तं पुरुषमुपगतान्तां कापि शङ्त्रकपिशाची। अविशदवशमस्या येन सर्व शरीरं प्रभवति न कथञ्चित्कर्मणः साधनाय। पिशाचावेशविक्शां प्रमिति तनयां श्रुतेः। न श्रद्धधाति पुरूषः प्रमाणयत् तां कुतरा। इहैव पक्षता– परामर्शयोः सञ्चमादनुमितेः जन्म, तया च पुरुष सङ्गति, अनुमित्या सङ्गतस्य पुरूषस्य प्रमितौ पुनः श्रद्धा संसूचिता भवति। यथा चाह विविदिषा–भगवति, साम्प्रतमनुमित्या सह सङ्गतः पुरुषस्तस्या जल्पितेन बोधितः श्रोतीं प्रमिति भवतीं च बहु मन्यते। शशाम किलानुमितिजल्पितेन श्रौतप्रमितेः पिशाचावेशः, पुरूषस्य च श्रुतावणमिजातभ्रमः। इत्यादि। पुनश्च श्रद्धा कथयति –घटितः प्रमित्याानुमित्या च पुरुषः

साम्प्रतमसरोऽस्य सिद्धिसड्.गमस्य। इत्यादि। एवम्प्रकारेणात्र निक्षिप्त बीजं सुव्यक्तं परिलक्ष्यते, तेनात्र पताकाख्या अर्थप्रकृतिः प्राप्त्याशया कार्यावस्थया सड्.गता गर्भसन्धि रूपेण कारिणमति। सिद्धया समन्वितः पुरूषः मोक्षरूपमपवर्गमादमर्हो भवति।

**निष्कर्षः**

अत्रादौ रीतिसम्प्रदायस्य आचार्याः, तेषां लक्षणानि चोपस्थाप्य प्रबोधचन्दोदयादि नाटके तस्य समन्वयः विवेचितो विद्यते।

**संदर्भाः**

1. काव्यात्ममीमांसा, प0 सं0– 102 – 107।
2. तत्रैव।
3. ध्वन्यालोके।
4. काव्यमीमांसायाम्।
5. राजशेखरप्रणीतकाव्यमीमांसायां, प्रथमाध्याये।